19.08.20
4

(12) तनुद्विजः शीघ्रगतिः शशोऽयं शठोऽतिशूरो निभृतप्रचारः।
वनाद्रिदुर्गेषु नदीषु सक्तः क्षयोरस्थी नातिलघुः प्रसिद्धः॥
कुत्रास्तीदम् ?
उत्तरम्- सारावल्याम्।
(13) रक्तं पीनकपोलमुन्नतनसं वक्त्रं सुवर्णोपमं वृत्तं चास्य
शिरोऽक्षिणी मधुनिभे सर्वे च रक्ता नखाः।
स्रग्दामाङ्कुशशङ्खमत्स्ययुगलक्रवङ्गकुम्भाम्बुजैश्चि-
ह्नैर्हंसकलस्वनः सुचरणो हंसः प्रसन्नेन्द्रियः॥
कस्य पुरुषस्य लक्षणमिदम् ?
उत्तरम्- हंसपुरुषस्य।
(14) हंसपुरुषः कियदङ्गुलपरिमितमुन्नतं धारयति ?
उत्तरम्- षण्णवत्यङ्गुलपरिमितम्।
(15) हंसपुरुषः कियति वर्षाणि जीवति ?
उत्तरम्- नवतिवर्षाणि।
(16) पातीहदेशांश्च च शूरसेनान् गान्धारगङ्गायमुनान्तरालम्।
जीवेन्नवत्यब्दसङ्ख्यां पश्चाद्वनान्ते समुपैति नाशम्॥
कुत्रेदं सङ्गीतं पद्यम् ?
उत्तरम्- सारावल्याम्।
(17) सुश्लक्ष्णकेशो रक्तश्यामः कम्बुग्रीवो व्यादीर्घास्यः।
शूरः क्रूरः श्रेष्ठो मन्त्री चौरस्वामी व्यायामी च॥
इति कस्य पुरुषस्य लक्षणम् ?
उत्तरम्- रुचकपुरुषस्य।
(18) उज्जयिन्यां कः पुरुषः राज्यं करोति ?
उत्तरम्- रुचकपुरुषः।

डॉ० सुदिष्ट कुमार
सहा०प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।

# वस्तुनिष्ठप्रश्नाः

## शास्त्री-I, II

19.08.20
3

(1) कतिविधाः पुरुषाः भवन्ति?
उत्तरम्- सप्तविधाः।
(2) कति गुणाः भवन्ति?
उत्तरम्- त्रयो गुणाः।
(3) कीदृशः मालव्यपुरुषः?
उत्तरम्- नागनासः।
(4) मालव्यपुरुषस्यायुः कति वर्षाणि?
उत्तरम्- सप्ततिवर्षाणि।
(5) वक्त्रं त्रयोदशमितानि तथाङ्गुलानि दैर्घ्येण कर्णविवराद्दश विस्तरेण।
मालव्यसंज्ञमनुजः स भुनक्ति नूनं लाटं समालवससिन्धुसपारियात्रम्॥
कुतः गृहीतमिदं पद्यम्?
उत्तरम्- सारावलीतः।
(6) त्वक्शुक्रसारः पृथुपीनवक्षाः सत्त्वाधिको व्याघ्रमुखः स्थिरश्च।
क्षमान्वितो धर्मपरः कृतज्ञो गजेन्द्रगामी बहुशास्त्रवेत्ता॥
कस्य पुरुषस्य लक्षणमिदम्?
उत्तरम्- भद्रपुरुषस्य।
(7) कति वर्षपरिमिता आयुर्भद्रपुरुषस्य?
उत्तरम्- अशीतिवर्षाणि।
(8) स्वतन्त्रः सर्वकार्येषु स्वजनं प्रति न क्षमः।
भुज्यते विभवश्चास्य नित्यं बन्धुजनैः परैः॥
इति कुतः गृहीतम्?
उत्तरम्- सारावलीतः।
(9) उन्नतदन्तः कः भवति?
उत्तरम्- शशपुरुषः।
(10) कियदङ्गुलपरिमितमुन्नतं भवति शशसंज्ञक पुरुषस्य?
उत्तरम्- द्विनवत्यङ्गुलपरिमितम्।
(11) मध्यमार्गः दुर्बलः कस्य भवति?
उत्तरम्- शशपुरुषस्य।

P.T.O

अथात्र केन्द्रत्रिकोणेशयोर्दोषयुक्तावपि योगमाह —

केन्द्रत्रिकोणनेतारौ दोषयुक्तावपि स्वयं ।
सम्बन्धमात्राद् बलिनौ भवेतां योगकारकौ ॥

अन्वयः — केन्द्रत्रिकोणनेतारौ स्वयं दोषयुक्तौ अपि
सम्बन्धमात्राद् बलिनौ सन्तौ योगकारकौ भवेताम् ।

संस्कृत — बलिनौ केन्द्रत्रिकोणनेतारौ अर्थात् बलिनौ
दशमेश नवमेशौ, यदि तौ स्वयं त्रिषडायाधीशावपि भवत
तदाऽपि यदि अनयोः सम्बन्धो भवति तथा च तौ योगका
रकौ भवतः । अत्र विचारार्थं लग्नस्यैको गुणः चतुर्थस्य
द्वौ सप्तमस्यत्रयः दशमस्य चत्वारः पञ्चमस्य द्वौ नवम
स्य चत्वारः । तृतीयस्यैकः षष्ठस्यद्वौ एकादशस्यत्रयोगु
पूर्वैः कल्पिताः । तत्र लग्नेशपञ्चमेशयोः सम्बन्धवशाद्भा-
ग्ययोगस्य त्रयोगुणाः सम्पन्नाः । तत्र तृतीयेशसम्बन्ध
द्वा षष्ठेशसम्बन्धाद्भाग्ययोगोवशिष्यते । परं लाभेशस्य
वा तृतीयषष्ठाधीशयोर्वा सम्बन्धान्न भाग्ययोगः तुल्य
शुभपापगुणत्वात् । चतुर्थपञ्चमाधीशयोरसम्बन्धे तद्व
तृतीयलाभाधीशयोः सम्बन्धवशाद्भाग्ययोगाभावः ।
सप्तमेशपञ्चमेशसम्बन्धे षष्ठलाभाधीशयोः सम्बन्धा
द्भाग्ययोगाभावः दशमेश चतुर्थेशयोः सम्बन्धे तृतीय-
षष्ठैकादशाधिपानां सम्बन्धवशाद्भाग्ययोगाभावः । तथैव
लग्नेशनवमेशयोः सम्बन्धे षष्ठेश लाभेशयोः सम्बन्धा
द्भाग्ययोगाभावः नवमेशचतुर्थेशयोः सम्बन्धे तृतीय-
षष्ठलाभेशानां सम्बन्धवशाद्भाग्ययोगाभावः । परं
सप्तमनवमेशयोः सम्बन्धे त्रयाणां पापानां सम्बन्धेने-
कोगुणोवशिष्यते । तथा दशमेशनवमेशयो सम्बन्धे

P.T.O

त्रयाणामपि सम्बन्धसत्वे दोषगुणौ भाग्ययोगस्यावर्जि-यते । तेन दशमनवमाधीशयोरेव सम्बन्धः सर्वसम्ब-न्धाद्बलीयः अमुमेवार्थमत्र वर्णयति । बलिनौ केन्द्रत्रि-कोणनेतारौ दशमनवमाधीशौ स्वयं दोषयुक्तावपि चेर-स्तस्तदापि सम्बन्धवशाद्योगकारकौ तौ भवेतां सामान्यरूपेणैवेति शेषः ॥

क्षेमङ्करी – केन्द्रेश व त्रिकोणेश दोनों अथवा दोनों मे से एक अपने किसी दोष से युक्त हो तो भी केवल परस्पर सम्बन्ध होने से बलवान् होते हैं और योगकारक होते हैं । केन्द्रेश शुभ ग्रह हो, तो स्वयं दोषी होता है और नीच, अस्त आदि होना भी स्वयं उनके दोष हैं ।

विमर्श – श्लोकोक्त 'दोषयुक्तावपि' शब्द का विभिन्न आचार्यों ने विभिन्नार्थ किया है । किसी ने केन्द्र त्रिकोण के स्वामियों का अपने दोष से दुषित होने अर्थात् केन्द्रेश होने का दोष, अस्त रहना या नीच का होना आदि को माना है । किसी ने त्रिषडायेश भी होना स्वयं का दोष माना है । कुछ भी हो उपरोक्त दोष होने में ग्रह के योगकारी सम्बन्ध होने पर वह बली ही माना जाना चाहिए । चूंकि पूर्वश्लोक 'केन्द्रत्रिकोण पतयः सम्बन्धेन' आदि मे केन्द्र व त्रिकोण से भिन्न भाव के स्वामी होने पर या सम्बन्ध होने पर योगफल में कमी होने की बात कही जा चुकी है । फिर 'दोष युक्तावपि' का अर्थ त्रिषडायेश होने से लगाना ग्रन्थकर्ता के कथन में विरोधाभास का होना हो जाएगा । लेकिन ग्रह के स्वयं का दोष केन्द्रेश होना, नीच होना, शत्रु राशि में रहना या अस्त रहना आदि हो सकता है और जिससे आचार्य के कथन की पुष्टि भी हो जाती है ।